National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2016; 1(5): 04-07
© 2016 NJHSR
www.sanskritarticle.com
Received: 09-03-2016
Accepted: 10-03-2016

**ममता,**
शोध छात्रा, विशिष्टद्वैतविभागः,
दर्शनसंकायः,श्रीलालबहादुरशास्त्री
राष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली 110016

**Correspondence:**
**ममता,**
शोध छात्रा, विशिष्टद्वैतविभागः,
दर्शनसंकायः,श्रीलालबहादुरशास्त्री
राष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली 110016

# विशिष्टाद्वैतवेदान्ते प्रमाणविचारः

**ममता**

विशिष्टाद्वैतसिद्धान्तसम्बन्धिविषयाणां प्रतिपादनपूर्वकं प्रमाणविचारस्य प्रतिपादनमत्र करिष्ये। अनादिकालात्प्रवहमानेषु श्रुतिवाक्येषु विशिष्टाद्वैतसिद्धान्तः परमरहस्यरूपः निगूढः। सः सिद्धान्तः स्वयं भगवतैव जीवगणमुक्तय उपदिष्टः। जीवसम्बन्ध्यन्धकारविमोचनायादावयं सिद्धान्तः जगन्मात्रे श्रियै उपदिष्टः, स एव कालक्रमेण जीवाख्यवत्सरक्षणाय कामधेनुस्वरूपश्रिया भगवत्प्रपत्तिनिष्ठेषूपदिष्टा। एवं कारुण्यजनितोप देशक्रमोऽद्यात्यन्तसुलभः वर्तते। आचार्यवाक्यानां साक्षात्मन्त्रास्वरूपत्वावगमाद्यपि तान्येव सर्वैः सर्वात्मनाश्रयणीयाण्थापि स्वाधीतावगतिमिह किञ्चिन्निवेदतियुमीहे।
विशिष्टाद्वैतमित्यस्य शास्त्रस्य नामकरणमत्यन्तमर्वाचीनमेव। न कुत्रचिदपि श्रीभाष्ये ततः पूर्वाचार्याणाञ्च ग्रन्थेषु विशिष्टाद्वैतशब्दप्रयोगः दृश्यते। श्रीभाष्य आचार्यप्रयुक्ते द्वे पदे तदनन्तरकालिकपण्डितान् एतन्नामकरणे प्राय उत्साहितः स्यात्। द्वे पदे च - **प्रकारद्वयविशिष्टैकवस्तु**[1], **प्रकारद्वयावस्थितैकवस्तु**[2] **च** ।[3]

साक्षाच्चास्य शब्दस्य प्रयोगः भगवद्रामानुजविरचितग्रन्थानां व्याख्यानेषु प्राप्यते। यथा षड्विधतात्पर्यलिघ्गमद्वैतविषयमित्येतदभ्युपगम्। तत्तु न निर्विशेषाद्वैतविषयम्, अपि विशिष्टाद्वैतविषयम्।[4] उपसंहारगतं तत्त्वमसीति सामानाधिकरण्यं प्रवृत्तिनिमित्तभेदेन एकार्थविषयत्वात् विशिष्टाद्वैतविषयम् इति।[5] विशिष्टाद्वैतशब्दस्य द्वेध निर्वचनं भवति।

**विशिष्टस्याद्वैतम् -** अनेन निर्वचनेन चिज्जीवस्याचितः प्रकृतेश्च विशिष्टब्रह्मण एकत्वमभिप्रेतम्।

**विशिष्टयोरद्वैतम् -** सूक्ष्मचिद्विशिष्टं स्थूलचिद्विशिष्टञ्चेति विशिष्टयोरद्वैतमिति। आद्यनिर्वचनं चिदचितोर्ब्रह्माधीनत्वप्रतिपादकम्।

विशिष्टस्याद्वैतमिति प्रख्यातमिदं दर्शनं सर्वोत्कृष्टं त्रयय्न्तसिद्धान्तस्य साररूपं तत्त्वत्रयं यथार्थभूतं प्रख्यापयति। तत्त्वशब्दः प्राचुर्येण वास्तविकभूतपदार्थबोधकः भवति। तत्त्वानां त्रयं तत्त्वत्रयमिति वक्तुं शक्यम्। तदेव तत्वत्रयं चेतनाचेतनेश्वररूपं भवति। प्रकृतौ चेतनशब्दः जीवगणवाचको भवति। अचेतनशब्द प्रकृतमीश्वरशक्तिरूपार्थे पर्यवस्यति। ईश्वरशब्दश्च सर्वनियन्तृपरमात्मरूपं श्रीमन्नारायणं ख्यापयति। यद्यपीश्वर एकमेव प्रमुखं तत्त्वमन्यत्सर्वं तस्मिन्नेव प्रतिष्ठितमथापि तेषामीश्वरविशिष्टत्वेऽपीश्वरविलक्षणत्वादिह तत्वस्य त्रित्वविभागः ।[6]

**तत्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः।**
**तत्वमेको महायोगी हरिर्नारायणः प्रभुः।।**[7]

इति प्रसिद्धोक्तिः सर्वतोमुखप्रमाणैस्तत्वविचारयितृणामन्तिमनिष्कर्ष एकमेव तत्त्वमिति बोध्यति। नेदं एकतत्त्वसिद्धान्तः ब्रह्मणः निर्विशेषत्वसाधकाऽपि तु समस्तचेतनाचेतनैः ब्रह्म विशिष्टमित्येव ज्ञापयति। न कश्चित्पदार्थ इह जगति ब्रह्मविशेषणरहितः तिष्ठति। सर्वमपि चेतनाचेतनं ब्रह्माधारितं, ब्रह्मनियन्त्रितं, ब्रह्मणः शेषभूतञ्च। अतैव ते सर्वे ब्रह्मणः शरीरभूताः। अस्मच्छरीरस्यास्मद्विशेषणवत् ब्रह्मेतरं सर्वमपि तच्छरीरभूतं तद्विशेषणञ्च। अस्मासु अहन्त्वबुद्धिवदीश्वरस्य चेतनाचेतनविशिष्टस्वरूपऽहन्त्वबुद्धिः भवति। श्रुतिरपि **'बहु स्यां प्रजायेये'**[8] ति ब्रह्मसंकल्पं बोधयति। चेतनाचेतनविशिष्टं ब्रह्म न प्रत्यक्षादिलौकिकप्रमाणगोचरमपि तु शास्त्रौकसमधिगम्यम्। अत एव तैः प्रमाणैः ईश्वरीयचेतनाचेतनात्मकत्वबुद्धिरस्मासु न जायते। स्वतन्त्ररूपेण पदार्थानां ज्ञानं वस्तुतोऽज्ञानमेव। **'सर्वं खल्विदं ब्रह्म'**[9] जगत्सर्वं शरीरं ते इत्यादिप्रमाणाद्धरणमीश्वरस्य

चेतनाचेतनविशिष्टत्वसाधकम्। विशिष्टप्रतीतिः विशेषणं, विशेष्यं, सम्बन्धञ्चाश्रित्य भवति चेतनाचेतनविशिष्टं ब्रह्मेति प्रतीतौ ब्रह्म विशेष्यम्, चेतनाचेतने तद्विशेषणे। ब्रह्मणः चेतनाचेतनेन सह शरीरात्मभावसम्बन्धः। विशेषणरूपमुभयमपि परस्परमत्यन्तविलक्षणभूतम्। सर्वथा चेतनमचेतनभावं तथैवाचेतनं चेतनभावं प्राप्तुं न प्रभवति। चेतनाचेतनोभयमपि अनन्तरूपं तयोरवान्तरभेदानामसङ्ख्यात्वात्। विशेषणभूते चेतनाचेतने विशेष्यभूतं ब्रह्माप्यत्यन्तविलक्षणे। ब्रह्मणः तयोः सह स्वरूपैक्यं सर्वप्रकारेणासम्भवमेव। कारणविशिष्टत्वप्रतीत्या विशेषणविशेष्येष्वात्यन्तिकभेदः सुस्पष्टः। एवं सति '**एकमेवाद्वितीयम्**'[10] **, नेह नानास्ति किञ्चन**'[11] त्यादिभेदनिषेधकश्रुतीनां विरोधप्रतीतिरिरिति नाशङ्कनीयम्, यतो हि एकमेवाद्वितीयमित्यादिकवाक्यानि विशिष्टं वस्त्वेकमेव, नानेकमिति बोधन एव तात्पर्यमावहति। तथैवेकमेवेति प्राधन्यर्थज्ञापनेन तस्य प्राधन्यतां प्रकाशयति। नेह नानास्ति किञ्चनेत्यादि भेदनिषेधकवाक्यानि तु विशिष्टब्रह्मणः बहिर्भूतं स्वतन्त्रभेदनिषेधितमिति तात्पर्यमवगमयति। सर्वमपि पदार्थभूतं ब्रह्मात्मकमत एवैकरूपम्। अब्रह्मात्मकं किञ्चिदिह न विद्यत इति सारः। यद्येतेषां श्रुतीनां निर्विशेषगब्रह्मबोधने तात्पर्यमिति यदि मन्यामहे तर्हि सकलश्रुतिस्मृतिविरोधः समुपतिष्ठेत। तथा च **पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति**[12] **, ज्ञाज्ञौ द्वावजावीशनाशौ**[13] **, द्वा सुपर्णा सयुजा सखाया**[14] **, यस्यात्मा शरीरम्, यस्य पृथिवी शरीरम्, यस्य तमः शरीरम्**[15] **, क्षरं प्रधनममृताक्षरं हरः। क्षरात्मानावीशते देव एकः, प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया। विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणी।।** इत्यादिश्रुतिस्मृतयः कुप्येरन्। अनुमानादिरपि कथमपि न निर्विशेषब्रह्मबोधकः।

मुमुक्षोर्जीवस्य मोक्षसिद्धये तत्वत्रयस्य ज्ञानमनिवार्यमेव। श्रुतिश्च **- इह चेदवेदीदथ सत्यमस्ति नो चेदिहावेदीन् महती विनष्टिरि**[17] त्युपदिशति। भोक्ता भोग्यं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति इति श्रुतिरपि पूर्वोक्तार्थसमर्थकमेव।

प्रमाणमीमांसा **-** '**प्र**' उपसर्गक '**मा**' धातोर्भावे करणे च ल्युटिप्रत्यये कृते सति प्रमाणशब्दस्य निष्पत्तिरिति शास्त्रकाराः। भावार्थे ल्युटिप्रत्यये सति प्रमैव प्रमाणमिति स्वरूपं तिष्ठति। करणार्थे च ल्युटिप्रत्यये कृते सति प्रमायाः करणं तदिति सिद्धयति। स्वाभिप्रायानुगुणं तत्तत्सिद्धान्तवादिनः लक्षणमभिमन्यन्ते। प्रमाणानि यद्यप्यसङ्ख्यानि तथापि शास्त्राकारैः सर्वप्रमाणानां तत्तत्स्वभावानुगुणं प्रमाणमीमांसायै लाघवार्थञ्च प्रमाणविभाजनं कृतं दृश्यते। तदनुगुणं स्थूलदृष्ट्या प्रमाणसंख्यान्वेषणे सत्येकप्रमाणादारभ्याष्टप्रमाणाभ्यन्तरे सर्वप्रमाणान्यन्तर्भावयितुं प्रवर्तन्ते। प्रमाणां सर्वेषामपि प्रामाण्यमव्याहतमथापि तेषां गणनाविषय एव मतिभेदः बहुधा दृश्यते शास्त्रेषु। दर्शनेषु प्रमाणस्वीकारस्थितिः प्रसिद्धकारिकयेह निवेद्यते-

**प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।**
**अनुमानञ्च तच्चापि सांख्याः शब्दश्च ते उभे।।**
**न्ययैकदेशिनोऽप्येवमुपमानञ्च केवलम्।**
**अर्थापत्त्या सहैतानि चत्वार्याहुः प्रभाकराः।।**
**अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।**
**सम्भवैतिह्ययुक्तानीति पौराणिका जगुः।।**

विशिष्टाद्वैतशास्त्रे च प्रमाणत्रैविध्येनैव कार्यनिर्वाहः। प्रत्यक्षानुमानशब्दभेदेन त्रैविध्यम्। अन्येषां पराभिमतप्रमाणानामप्येतेष्वेवान्तर्भावः।

**प्रत्यक्षप्रमाणस्वरूपम् –**

इदं प्रमाणेष्वाद्यप्रमाणत्वेन परिगण्यते, सर्वशास्त्रकाराणामेकमत्याभिमतमपि। प्रत्यक्षज्ञानस्येन्द्रियप्रवृत्त्यधीनत्वात् त्वरितज्ञानकरत्वाच्चाद्यत्वपरिगणनं स्यादिति मन्ये। प्रत्यक्षप्रमाणाज्जायमानं ज्ञानं प्रत्यक्षज्ञानमिति कथ्यते। आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षमिति ज्ञानग्रहणप्रकारः। इह सिद्धान्ते प्रतिपादितलक्षणस्य प्रतिपादनमिह करोति।

**साक्षात्कारिप्रमाकरणवं प्रत्यक्षत्वम्**[18] इति प्रत्यक्षप्रमाणस्य लक्षणं भवति। प्रमा च **यथावस्थितव्यावहारानुगुणं ज्ञानं**[19] भवति। करणञ्च साधकतममसाधारणं वा करणं भवति। साक्षात्वञ्चेतरसाधनानपेक्षरूपं भवति। प्रत्यक्षप्रमाणस्य प्रमाकरणत्वमात्रलक्षणकरण इतरप्रमाणेषु तस्यातिव्याप्तिः भवति।अव्याप्तिर्नाम लक्षणस्य लक्ष्यतावच्छेदकसमनियतत्वे सति लक्ष्येतरवर्तित्वमेव भवति। इदं लक्षणस्य दोष इति कथ्यते। तथा च प्रमाकरणत्वस्य प्रत्यक्षप्रमाणे परिपूर्णऽप्यनुमानादिष्विहालक्ष्यभूतेषु सत्वात्, केवलप्रत्यक्षप्रमाणस्य अवगाहनेऽसामर्थ्यमेव भजते। अतो दोषनिवारकं इतरव्यावर्तकलक्षणस मपादने साक्षात्कारित्वविशेषणमुपयुज्यते। साक्षात्वऽन्यप्रमाणादिष्वसिद्धमेव, तेषां विविधसाधन अनन्तरसापेक्षत्वावगमात्। तथा च साक्षात्कारित्वं प्रमाकरणत्वोभयमपि जक्ष्ये सत्वादिदं लक्षणं निर्दुष्टं समर्थञ्च। साक्षात्कारिप्रमाकरणत्वं स्मृतिप्रमाणऽप्यस्ति किन्तु तत्प्रत्यक्षप्रमाण एवान्तर्भावितमत्र शास्त्रे। स्मृतेः संस्कारसापेक्षत्वात् प्रत्यक्षमूलत्वाच्च तथान्तर्भावः कृतः विद्यते।

पूर्वानुभवदजन्यसंस्कारमात्राजन्यं ज्ञानं हि स्मृतिरिति लक्ष्यते। सर्वमपि ज्ञानं प्रमाणभूतमित्यस्मद्सिद्धान्तविशेषः। तथापि व्यवहाराबाधाय प्रमाभ्रमव्यवस्था क्रियते। अयं विशेषः ख्यातिविचारे यथार्थख्यातेः षष्ठस्य समर्थने बहुध ग्रन्थेषु दृश्यते। यथार्थख्यातित्वञ्च ज्ञानविषयस्य सत्यत्वरूपमेव। त्रिवृत्करणप्रक्रियया पञ्चीकरणप्रक्रियया वा सर्वत्र सर्वभूतानां सत्वस्यावगतत्वादेवद भ्रमस्थलऽपि ज्ञानविषयस्य सत्यत्वमव्याहतं तिष्ठति। ईदृशं प्रत्यक्षं निर्विकल्पकप्रत्यक्षम्, सविकल्पकप्रत्यक्षमिति च विभज्यते। गुणसंस्थानादिविशिष्टप्रथमपिण्डग्रहणं निर्विकल्पकमुच्यते। तदेव सप्रत्यवमर्शं गुणसंस्थानादिविशिष्टद्वितीयादिपिण्डग्रहणं सविकल्पकमुच्यते। प्रत्यक्षञ्चादौ जात्यादिरूपभेदविशिष्टमेव वस्तु गृह्णाति। उभयमपि प्रत्यक्षं

विशिष्टविषयमेवेति सिद्धान्तसम्मतिः। यतो ह्यविशिष्टग्राहिणो ज्ञानस्य कदाप्यनुपलम्भानुभवात्, अनुपपत्तेश्च। इन्द्रियस्य चार्थस्य च ग्रहणे संयोगः सम्बन्धः भवति, एवमर्थगतरूपादिग्रहणे संयुक्ताश्रयणसम्बन्धस्य स्वीकारः भवति। नैयायिकाद्यभिमतवदत्र समवायस्य सम्बन्धत्वं नात्र शास्त्रे पोष्यते। प्रत्यक्षमेवार्वाचीनानर्वाचीनभेदभाग्भवति। अर्वाचीनमिन्द्रियसापेक्षजनितं प्रत्यक्षं भवति। अनर्वाचीनप्रत्यक्षञ्चेन्द्रियसहकारानपेक्षं नित्यमुक्तेश्वरज्ञानं भवति।

## अनुमानप्रमाणस्वरूपम् -

इदं द्वितीयं प्रमाणं प्रमाणकोटौ। चार्वाकव्यतिरिक्ताः सर्वेप्यनुमानप्रमाणमङ्गीकुर्वन्ति। **अनु** इत्युपसर्गस्य पश्चादित्यर्थः प्रसिद्धः। मानमितिरर्थाज्ज्ञानमुच्यते। एकांशेन प्रत्यक्षमनुमानप्रमाणस्य सहकरं भवति। अनुमानप्रमाणज्जायमानं ज्ञानमनुमितिरिति कथ्यते। ततश्चानुमितिकरणमनुमानमिति लोकव्यवहारः। अनुमितिरिति निश्चयज्ञानस्यासाधरणकारणत्वमनुमाने सन्निहितम्। अनुमानञ्च स्वस्मिन् पक्षं साध्यं हेतुं दृष्टान्त´चाङ्गत्वेन भाव्य तिष्ठति। अनुमितिरिति ज्ञानस्य लक्षणन्तु **- व्याप्यस्य व्याप्यत्वानुसन्धानाद्व्यापकविशेषप्रमितिरिति।** पर्वतो वह्निमान् धूमत्वात्, महानसवदित्याख्ये प्रसिद्धेऽनुमाने समन्वयप्रकारस्त्वेवम - व्याप्यस्य धूमस्य वह्निव्याप्यत्वानुसन्धानाद्व्यापकविशेषप्रमितिर्वह्निप्रमितिर्भवति। तदेव व्याप्यं कथ्यते यदनधिकदेशकालनियतं भवति। व्यापकन्त्वन्यूनदेशकालवृत्ति भवति। व्याप्यव्यापकयोः निरुपाधिकनियतसम्बन्धो व्याप्तिरिति सम्बन्धः वक्तुं शक्यते।

व्याप्तिरिति सम्बन्धः द्विधा भवति - अन्वयव्याप्तिः व्यतिरेकव्याप्तिश्चेति। साधनविधौ साध्यविधिरूपेण प्रवृत्ता व्याप्तिरन्वयव्याप्तिः कथ्यते। तदाकारश्चेकम् - यो यो धूमवान् साऽग्निमानिति। व्यतिरेकव्याप्तिश्च साध्यनिषेधे साधननिषेधरूपेण प्रवर्तते। तदाकारश्च - योऽनग्निः स निर्धूम इति। अत्र व्याप्तिलक्षणे निरुपाधिकत्वविशेषणस्य सम्बन्धस्यात्याज्यमेव। उपाधिरिति कश्चिद्दोषः। तथा चोपाधिविशिष्टा व्याप्तिः दोषपूर्णार्थाद्दुष्टा भवत्येव। उपाधिश्चैवं निर्वच्यते - साध्यव्यापकत्वे सति साधनाव्यापकत्वम्। पर्वतो धूमवान् वहेन्नरितयनुमाने विहिन्ना धूमे साध्यमानेऽऽर्द्रेन्धनसंयोग उपाधिर्भवति। उपाधिश्च कदाचिन्निश्चितरूपा कदाचिच्छङ्कीतरुपा च भवति।

अनुमितिज्ञानस्य करणे व्याप्तिज्ञान-पक्षधर्मताज्ञाने च भवतः। साधनमेव व्याप्यं भवति। पक्षधर्मत्वं सपक्षत्वं विपक्षव्यावृत्तमबाधितविषयत्वमसत्प्रतिपक्षत्वमिति पञ्चरूपाणि व्याप्यस्य भवन्ति। सिषाधयिषितधर्मविशिष्टत्वं पक्षत्वं भवति। तदुदाहरणञ्च - अग्निमत्वादिसाधने पर्वतादिरेव। सपक्षश्च तदुच्यते यत् सिषाधयिषतसजातीयधर्मवान् भवति। यथा महानसप्रभतयः। विपक्षश्च साध्यतज्जातीयशून्यो कथ्यते। यथा महाह्रदादिः वहिन्मत्वादिसाधनानुमानानाम्। बाधितविषयत्वं नाम निश्चितसाध्याभाववत्वं भवति। ह्रदो वह्निमानित्युदाहरणम्। तदभाववत्वमबाधितविषयत्वं भवति। समबलतया प्रतीयमानप्रमाणोपरोधाभावत्वमेवासत्प्रतिपक्षत्वमिति व्यवह्रियते।

अन्वयव्यतिरेकी-केवलान्वयीतिहृदा च द्वे भेदे व्याप्यस्य भवतः। केवलव्यतिरेकीति व्यवह्रियमाना व्याप्यभेदा नात्र सिद्धान्त आद्रियते। साध्याप्रसिद्धत्वकारणमेव तदस्वीकारकारणम्। स्वार्थानुमानं परार्थानुमानमित्यनुमानस्य द्वे भेदे स्तः। प्रतिज्ञाहेत्वादिपञ्चावयवयुक्तबोधकवाक्यमेवानुमानं कथ्यते। साध्यवत्तया पक्षवचनं प्रतिज्ञेति कथ्यते। पर्वतो वहिनमानिति तत्स्वरूपम्। लिंगस्य कारणस्य वचनमेव हेतुर्भवति, यथा धूमवत्वादिति। उदाहरणं नाम दृष्टान्तप्रदर्शनं तच्च व्याप्तिनिर्देशनपूर्वकं स्यात्। तत्स्वरूपञ्च यथा - यो यो धूमवान् स सोऽग्निमान्, यथा महानसः, योऽग्निस्स निर्धूमो यथा ह्रद इति च। दृष्टान्तावमर्शनेन व्याप्तया पक्षे हेतूपसंहारवाक्यमुपनयनमुच्यते। उदाहरणञ्च - तथा चायं धूम इतिरूपम्। साधनपूर्वकं पक्षे साध्योपसंहारवाक्यमेव निगमनमिति कथ्यते। तस्मात्तथेति तत्स्वरूपमित्यर्थे तस्मात् तथा वहिन्मान् पर्वत इतिरूपम्। इति निर्दुष्टानुमानस्य स्वरूपविश्लेषणम्। उपाधित्वादिदोषयुक्तं तदेवानुमानं दुष्टं प्रामाण्यज्ञानसाधनासमर्थञ्च भवति। हेतुनिष्ठाः दोषाः हेत्वाभासरूपा पञ्च शास्त्रेषु परिगण्यते। सव्यभिचारविरुद्धासिद्धसत्प्रतिपक्षबाधिता ते भवन्ति।

## शब्दप्रमाणस्वरूपम् –

उपमानस्यानुमानान्तर्गतत्वेन स्वीकारात् तृतीयं प्रमाणं शब्दप्रमाणं भवति। शब्दप्रमाणेन शाब्दबोधः जायते। शास्त्रोऽस्मिन् शब्दप्रमाणस्वरूपन्तु - **अनाप्तानुक्तवाक्यजनितपदार्थं विज्ञानं शाब्दज्ञानं तत्करणं शब्दप्रमाणम्**[20] इति प्रोक्तम्। लक्षणेऽनाप्तत्वानुक्तत्वविशेषणौ वेदस्य पुरुषकृतत्वपक्षं व्यवर्तयतः। वेदश्च श्रुतिसंज्ञकः कर्मब्रह्मप्रतिपादक पूर्वोत्तरकाण्डाभ्यां विभक्तः। यज्ञाद्याराधनादिकर्मप्रतिपादकं पूर्वकाण्डं कथ्यते। आराध्यब्रह्मप्रतिपादकम् उत्तरकाण्डमिति च व्यह्रियते। उभयोः परम्परया प्रतिपाद्यविषयसंगत्या चैक्यशास्त्रमप्यत्र शास्त्रऽभिप्रेतम्।

वेदस्य षडांगानि भवन्ति। ते च छन्दः कल्पः शिक्षा निरुक्तं ज्योतिषं व्याकरणमिति च। वेद एव सर्वमूर्धन्यशब्दप्रमाणं भवति। तदविरुद्धत्व एवान्येषामपि प्रमाणत्वं सिद्ध्यति। तथा च वेदाविरुद्धव्यवहार-प्रायश्चित्तादिप्रतिपादिकानां आप्तमहर्ष्यादिप्रणीतानां मन्वादिस्मृतीनामपि प्रामाण्यमभीष्टम्। वेदाविरुद्धानां प्रसिद्धस्मृतीनां कथञ्चिदपि स्वीकारः नाभीष्टः। अत एव कापिलस्मृतीनां वेदार्थोपबृहणायोपगित्वं न स्वीक्रियते। पुराणादीनामपीयमेव गतिः। पुराणानि च सात्विक-राजस-तामसभेदेन त्रिविधानि कथ्यन्ते। शास्त्ररचनायां वेदविरुद्धपुराणांशो त्यज्यते। अन्यत् सर्वं प्रमाणपदीमधिरोहन्ति। भगवदुपदिष्टस्य पाञ्चरात्रागमस्य कृत्स्नस्यापि प्रामाण्यं तस्येषदपि वेदविरुद्धत्वाभावावगमात्। वैखानसागमादीनामपि प्रामाण्यमभीष्टम्। दिव्यसूरीणां दिव्यसूक्तयः प्रबन्ध-संज्ञकाः प्रमाणतराः भवन्ति, तथैव पूर्वाचार्याणाम्।

शब्दप्रामाण्ये वैदिकान्येव प्रमाणानीति नापि तु लौकिकान्यपि कानिचन प्रमाणत्वेन स्वीक्रियन्ते। आप्तोक्ताकाङ्क्षायोग्यतासन्निधिमल्लौकिकवाक्यानि प्रामाण्यानि भवन्ति। विशिष्टाद्वैतसिद्धान्तस्यायं विशेषः अन्ततो सर्वस्यापि शब्दस्य ब्रह्मण्यर्थावसानमेव। कथमिति चेदुच्यते - यथा शरीरवाचकशब्दानां यथात्मनि शरीरिणि पर्यवसानमनुभूयते तथैव भगवच्छरीरभूतब्रह्मरुद्राग्निवाचकशब्दानां प्रकृतिकालाद्यचिद्वाचकशब्दानाञ्च शरीरिणि परमात्मनि पर्यवसानमभीष्टम् ।।

1 श्रीभाष्यम्, पृ.सं. - 224
2 तत्रैव, पृ.सं. - 222
3 श्रीभाष्यप्रास्ताविकम्, पृ.सं. - 12(संस्कृतसंशोधन संसत् प्रकाशनम्)
4 वेदार्थसंग्रहव्याख्या
5 तत्रैव
6 (क) श्रीमन्नारायण एव चिदचिद्विशिष्टमद्वैतं तत्वम् - यतीन्द्रमतदीपिका-प्रत्यक्षावतारः, पृ.सं.-3.
(ख.) अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्वम्। तत्र प्रकारप्रकारिणोः प्रकाराणाञ्च मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादिविलक्षणैकत्वव्यपदेशस्तदितरनिषेधश्च। अन्यथा समस्तप्रमाणसंक्षोभप्रसघ्गात्। न्यायसिद्धाञ्जनम्, पृ.सं.- 4-5.
7 महाभारते मोक्षधर्मप्रकरणम्।
8 छान्दोग्योपनिषत् - 6-2-3.
9 छान्दोग्योपनिषत् - 3-141.
10 तत्रैव - 6-2-1.
11 बृहदारण्यकोपनिषत् - 6-2-3.
12 श्वेताश्वतरोपनिषत् - 1-6.
13 तत्रैव - 1-9.
14 मुण्डकोपनिषत् - 3-1-1.
15 बृहदारण्यकोपनिषत् - 5-7-7.
16 केनोपनिषत्।
17 श्वेताश्वतरोपनिषत् - 1-12.
18 यतीन्द्रमतदीपिका-प्रत्यक्षावतारः।
19 तत्रैव।
20 यतीन्द्रमतदीपिका तृतीयाऽवतारः।

## सन्दर्भग्रन्थसूची


1. यतीन्द्रमतदीपिका: वधूल श्रीनिवासाचार्यः, श्रीरंगजी मन्दिरम्, वृन्दावनम्, 1976.
2. न्यायपरिशुद्धिः : वेदान्तदेशिकः, श्रीवैष्णवसिद्धान्त सभा, मद्रास, 1982.
3. न्यायदर्शनम् : गौतमः, आशुतोषविद्याभूषण और नित्यबोध विद्यारत्न, कलकत्ता, 1919.
4. सर्वदर्शनसंग्रह : सायणमाधवः, भण्डारकर ओरिएण्टल रिसर्च इन्स्टिट्यूट, पुणे, 1978.
5. सर्वदर्शनसंग्रह : माधवाचार्यः, चैखम्भा, वाराणसी, 2004.
6. संस्कृतवाग्मय का बृहद् इतिहास : प्र. सं. श्री बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, लखनऊ, वि. सं. 2052.
7. वेदार्थ संग्रह : श्रीरामानुजाचार्य, सम्पादक श्रीरामवदनशुक्लः, सम्पूर्णानन्द संस्कृतविश्वविद्यालय, वाराणसी, 1991.
8. वेदान्तकारिकावलीविमर्शः : डॉ. केदारप्रसादपरोहा, अमरग्रन्थपब्लिकेशन्स, विजयनगर, दिल्ली, 2004.
9. उपनिषत्संग्रहः : मोतीलाल बनारसीदास, दिल्ली, 1984.


।। इतिशम् ।।